# <u>શ્રી તુલસી સ્તોત્રમ</u>

જગદ્ધાત્રી નમસ્તુભ્યં વિષ્ણોશ્ચ પ્રિયવલ્લભે ।
યતો બ્રહ્માદયો દેવા: સૃષ્ટિસ્થિતિ અંતકારિણ: ॥ 1 ॥

નમ: તુલસી કલ્યાણી નમો વિષ્ણુપ્રિયે શુભે ।
નમો મોક્ષપ્રદે દેવિ નમ: સમ્પત પ્રદાયિકે ॥ 2 ॥

તુલસી પાતુ માં નિત્યં સર્વાપદ્‌ભ્યોટપિ સર્વદા ।
કીર્તિતાપિ સ્મૃતા વાપિ પવિત્રયતિ માનવમ ॥ 3 ॥

નમામિ શિરસા દેવીં તુલસીં વલસત તનુમ ।
યાં દૃષ્ટ્વા પાપિનો મર્ત્યા મુચ્યંતે સવ્ર કિલ્બિષાત ॥ 4 ॥

તુલસ્યા રક્ષિતાં સર્વં જગદ એતત ચરાચરમ ।
યા વિનિર્હન્તિ પાપાનિ દૃષ્ટા વૈ પાપિભિર નરૈ: ॥ 5 ॥

નમ: તુલસે અતિતરાં તસ્યૈ બદ્ધાંજલિં કલૌ ।
કલયંતિ સુખં સર્વે સ્ત્રિયો વૈશ્યાસ્તથાપરે ॥ 6 ॥

તુલસ્યા નાપરં કિંચિદ દૈવતં જગતી તલે ।
યયા પવિત્રિતો લોકો વિષ્ણુ સંગેન વૈષ્ણવ: ॥ 7 ॥

તુલસ્યા: પલ્લવાં વિષ્ણો: શિરસ્યારોપિતં કલૌ ।
આરોપયતિ સર્વાણિ શ્રેયાંસિ વર મસ્તકે ॥ 8 ॥

તુલસ્યાં સકલા દેવા વસંતિ સતતં યત: ।
અત: તાં અર્ચયેલ્લોકે સર્વાન દેવાન સમર્ચયન ॥ 9 ॥

નમ: તુલસી સર્વજ્ઞે પુરુષોત્તમ વલ્લભે ।
પાહિ માં સર્વ પાપેભ્યો સર્વસંપત પ્રદાયિકે ॥ 10 ॥

ઈતિ સ્તોત્રં પુરા ગીતં પુણ્ડરીકેણ ધીમતા ।
વિષ્ણું અર્ચયતા નિત્યં શોભનૈ: તુલસી દલૈ: ॥ 11 ॥

તુલસી શ્રી: મહાલક્ષ્મી: વિદ્યાવિદ્યા યશસ્વિનિ ।
ધર્મ્યા ધર્માનના વૃંદા દેવદેવમન: પ્રિયા ॥ 12 ॥

લક્ષ્મી પ્રિય સખી દેવી દ્યૌ: ભૂમિર અચલા ચલા ।
ષોડશૈતાનિ નામાનિ તુલસ્યા: કીર્તયેન નર: ॥ 13 ॥

લભતે સુતરાં ભક્તમન્તે વિષ્ણુપદં તથા ।
તુલસી ભૂ: મહાલક્ષ્મી: પદ્મિની શ્રીહરિપ્રિયા ॥ 14 ॥

તુલસી શ્રી સખી શુભે પાપહારિણી પુણ્યદે ।
નમ: તે નારદનુતે નારાયણ મન: પ્રિયે ॥ 15 ॥

॥ ઈતિ શ્રી પુણ્ડરીક કૃતં શ્રી તુલસી સ્તોત્રં સંપૂર્ણમ ॥